**संस्कृतवार्ता:**

**दिनाङ्क :-17.08.2024**

**प्रात: - 06:55**

**<u>मेट्रोपरियोजना:</u>**

**केन्द्रीयमन्त्रिमण्डलेन देशे तिसृभ्य: नवीनाभ्य: मेट्रोरेलपरियोजनाभ्य: स्वीकृति: प्रदत्ता। एतासु परियोजनासु एकादशाधिक-षड्शतोत्तर पञ्चदशसहस्र-कोटिरूप्यकाणां बेंगलुरू-मेट्रो-रेलयानस्य तृतीयचरणं द्विशतोत्तर-द्वादशसहस्रकोटि-रूप्यकाणां च ठाणे-रिंग - मेट्रो रेलयानस्य भूयोऽपि त्रिसहस्रकोटिरूप्यकाणां च पुणेमेट्रोरेलयानस्य परियोजना: सम्मिलिता: सन्ति। मन्त्रिमण्डलस्य उपवेशनानन्तरं सूचनाप्रसारणमन्त्री अश्विनीवैष्णव: सूचितवान् यत् बेंगलुरू-मेट्रो-परियोजनया नगरे गमनागमन व्यवस्थायै साहाय्यं मेलिष्यति।**

**<u>बाङ्ग्लादेश:</u>**

**बाङ्ग्लादेशस्य अल्पावधये नियोजितस्य प्रशासनस्य प्रमुख: मोहम्मदयुनुस: बाङ्ग्लादेशे सर्वेषां हिन्दूनाम् अल्पसंख्यकानां सुरक्षाया: कृते आश्वासनं प्रदत्तवान्। श्रीयुनुस: ह्य: प्रधानमन्त्रिणा नरेन्द्रमोदिना सह दूरभाषे कृत-संवादे एनम् आश्वासनं प्रदत्तवान्। दौरभाषिके संवादे एतस्मिन् प्रवर्तमानस्थितिम् अवलम्ब्य विचार-विमर्शोऽपि जात:। श्रीमोदी लोकतन्त्राय स्थिराय शान्तिपूर्णाय प्रगतिशीलाय च बांग्लादेशाय भारतस्य समर्थनं पुनरावर्तितवान्।**

**<u>विधानसभानिर्वाचनं</u>**

**जम्मू-कश्मीरे विधानसभानिर्वाचन् आगामिमासस्य अष्टादश-दिनाङ्कात् आरभ्य त्रिषु चरणेषु भविष्यति, तत्रैव हरियाणायाम् अस्मिन् वर्षे अक्टोबर्-मासस्य प्रथमे दिनांके एकस्मिन् चरणे निर्वाचनं भविष्यति। जम्मू-कश्मीरस्य हरियाणायाः च मतदानस्य गणना अक्टोबर्-मासस्य चतुर्थे दिनाङ्के भविष्यति । मुख्यनिर्वाचनायुक्तः राजीवकुमारः ह्य: नवदिल्ल्यां जम्मू-कश्मीर-हरियाणा-**

राज्ययोः निर्वाचनकार्यक्रमस्य घोषणां कृतवान्। जम्मू-कश्मीरे प्रथमचरणस्य मतदान् आगामिमासस्य अष्टादश-दिनाङ्के, द्वितीयचरणस्य मतदानं पञ्चविंशतिः दिनाङ्के, तृतीयान्तिमचरणस्य च मतदानम् अस्य वर्षस्य अक्टोबर्-मासस्य प्रथमे दिनांके भविष्यति।

**विदेशमन्त्रालयः-वैश्विक-दक्षिणः**

राष्ट्रम् अद्य तृतीयस्य वॉयस-ऑफ-ग्लोबल-साउथ इत्यस्य शिखर-सम्मेलनस्य आभासियमाध्यमेन नेतृत्वं करिष्यति। शिखरसम्मेलनस्य अस्य विषयो विद्यते- सततभविष्याय एकं सशक्तं वैश्विकदक्षिणम्। विदेशमन्त्रालयेन विज्ञापितं यत् शिखरसम्मेलनमिदं सङ्घर्ष-खाद्योर्जा-सुरक्षा-सङ्कटानां तथा च व्यतीतेषु शिखरसम्मेलनेषु सञ्जातचर्चानां विस्तारणाय मञ्चत्वेन कार्यं समाचरिष्यति। अत्रावसरे विदेशमन्त्रालयस्य प्रवक्ता रणधीरजयसवालः प्रोदीरितवान् यत् एतस्मिन् सम्मेलने सर्वे वैश्विकदक्षिणदेशाः आमन्त्रिताः। अस्योद्घाटनसत्रं राज्यप्रमुखे प्रशासनस्तरे च भविष्यति। यस्य आतिथ्यं प्रधानमन्त्रिणा नरेन्द्रमोदिना करिष्यते।

**पैरालम्पिक क्रीडा**

अस्य वर्षस्य पैरालम्पिकक्रीडासु देशस्य चतुरशीतिः क्रीडकानां सर्वाधिसंख्यायुतं दलमेकं क्रीडिष्यन्ति। पैरालम्पिकक्रीडा एषा अस्य मासस्य अष्टाविंशति दिनाङ्कतः सितम्बरमासस्य अष्टमदिनांकं यावत् प्रचलिष्यति। सप्तचत्वारिंशत् क्रीडकाः प्रथमवारं भागं स्वीकुर्वन्ति।

**राष्ट्रियचलचित्र-पुरस्कारः**

नवदिल्ल्यां ह्यः द्वाविंशत्यधिकद्विसहस्रतमवर्षाय सप्ततितमस्य राष्ट्रियचलचित्रपुरस्कारस्य घोषणा जाता। ऋषभशेट्टीइत्येषः कान्ताराचलचित्रे अद्भुतम् उत्कृष्टं च अभिनयं कृत्वा ऐषमः सर्वोत्तमाभिनेतुः पुरस्कारं प्राप्तवान्। सर्वोत्तमाभिनेत्री पुरस्कारः तमिलचलचित्रस्य थिरूचित्राम्बलमइत्यस्य कृते

**नित्यामेननइत्यस्यै गुजरातीचलचित्रस्य च कच्छएक्सप्रेसइत्यस्य मानसीपारेखइत्यस्यै प्रदीयते।**